Title ______ Date ______
Page ______

# SANSRIT-309

प्र०1 (क) "अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत। जयेत कदर्यं दानेन जयेत सत्येन चानृतम्"। उक्त – पद्यस्य अन्वयं कृत्वा भावार्थमपि लिखत।

उ० उक्त – पद्यस्य अन्वयं – क्रोधम् अक्रोधेन जयेत्, असाधुम साधुना जयेत कदर्यम दानेन जयेत्, अनृतम च सत्येन जयेत

उक्त – पद्यस्य भावार्थः – कोपं शान्तभावनया, दुष्टं सद्भावनया, कृपणं दानेन, असत्यं च सत्येन जयेत इत्येव नीतिः

प्र०2 (ख) "कालेफलति सौभाग्यम." इति पाठस्य सारांश स्वशब्देषु लिखत।

उ० एकः राजा अतीव बुद्धिमान् प्रजावत्सलः च आसीत्। तस्य सभायाम् एकः लब्धदतः नाम जीर्णवस्त्रधारी निर्धनः प्रविशति राजा तस्मै एकं बीजापूरं फलं प्रयच्छति एकः साधुः लब्धदत्तात एकेन रूप्यकेण फलं क्रित्वा राज्ञे समपर्यति। पुनः एकः व्यापारी तत फलं लब्धदत्तात् फलं स्वीकार्य राज्ञे ददाति। पूर्ववत् एका नर्तकी लब्धदत्तात फलं स्वीकृत्य राज्ञे ददाति। राजा फलम् च खण्डयितुम् आदिशति। खण्डितात् फलात् रत्नानि अधः पतन्ति। वस्तुतः साधु, व्यापारी, नर्तकी सर्वे एव राज्ञा लब्धदतस्य परीक्षार्थे प्रेषिता आसन अतः नर धैर्येण – – पुण्यकर्माणि कुर्वन् जीवेत

प्र०3 (ख) "कालेफलति सौभाग्यम्" इति पाठमाधृत्य लब्धदतस्य चरित्र चित्रणं लिखत।

उ० "कालेफलति सौभाग्यम्" इति पाठमाधृत्य लब्धदतस्य चरित्र चित्रणं

① लब्धदतः सत्यवक्ता आसीत्। लब्धदतः मिथ्या कदापि न वदति

② लब्धदतः अल्पसंतोषी आसीत्। लब्धदतः संतोषवान आसीत्

③ लब्धदतः निर्लोभि आसीत्। लब्धदतः लोभी: न आसीत्

CLASSTIME

Title ______ Date ______
Page ______

(4) लब्धदतः विनम्र आसीत् । लब्धदतः क्रोधी न आसीत्
(5) लब्धदतः धैर्यशील अपि आसीत्

प्र०1 (ख) जीवन-संदेश इति पाठकाधृत्य कस्यापिदेवस्य नीतिपदस्य अन्वयं भावार्थ च लिखत ।

उ० पदच्छेदः - पूजितम् हि अशनम् नित्यम् बलम् उर्जम् च यच्छति ।
अपूजितम् तु तद् भुक्तम् उभयम् नाशयेत् इदम् ।
अन्वयः - पूजितम् हि अशनम् नित्यम् बलम् उर्जम् च यच्छति ।
तत अपूजितम् भुक्तम् तु इदम् उभयम् नाशयेत्

* पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति -
नित्यं पूजितम् अशनं किं यच्छति ? बलम् उर्जं च यच्छति
कथम् यच्छति ? यदि वयम् आदरेण, प्रसन्नमनसा रूक्षं शुष्कम् अपि भोजनम् भक्षयेम तद् भोजनम् अस्मभ्यं शक्तिं यच्छति किन्तु यदि अनादरेण स्वादिष्टं भोजनम् अपि भक्षयेम तद् भोजनं वृथा एव जायते । अपूजितम् अशनं किं कुर्यात् ? अपूजितम् अशनं बलम् उर्जं च नाशयेत् । अनेन भोजनेन शरीरे विकारा जायन्ते ।
**भावार्थः** - सम्मानेन भक्षितं रूक्षं रसहीनम् अपि अन्नं स्फूर्तिं शक्तिं च यच्छति किन्तु अनादरेण खादितं भोजनं शरीरस्य बलं वीर्यं च नाशयति

प्र०5 (ख) कन्याकुमारी क्षेत्रस्य विशिष्ठ परिचय प्रदेय ।
उ० कन्याकुमारी क्षेत्रस्य विशिष्ठ परिचय :-
(1) कन्याकुमारी नामकम् अद्वितीयं क्षेत्रं पूर्वसमुद्रस्य, पश्चिमसमुद्रस्य दक्षिण समुद्रस्य च सङ्गमे स्थितम् । भारतस्य मानचित्रे तमिलनाडु प्रदेशे दक्षिणकोणस्य अन्ते बिन्दुरूपेण दृश्यते एषा: कन्याकुमारी ।

CLASSTIME

Title ______ Date ______ Page ______

(2) कन्याकुमारी इति तीर्थस्थानं जगत प्रसिद्धम् अस्ति। अत्र प्रमुख दर्शनीय स्थानम् अस्ति विवेकानन्द स्मारकम् यत 1970 तमे वर्षे स्थापितम अभवत्।

(3) कन्या कुमारीतः यन्त्रचालितया नौकया स्मारकं प्रति गन्तुम् शक्यते।

(4) तिरुक्कुरल नामकः ग्रन्थः तमिलुवेदः अपि कथ्यते। तिरुवल्लुरस्य प्रतिमायाः पदतलं प्राप्य नमस्कृत्य ततः पुनः नौका स्मारकं प्रति गच्छति।

(5) स्मारकस्य एकस्मिन् भागे विवेकानन्द साहित्यस्य वेदान्त साहित्यस्य विक्रय व्यवस्था अपि अस्ति।

(6) स्मारके यदा कदाचित् विशाला प्रदर्शनी अपि आयोज्यते

(7) तत्र संस्कृत नाटकानां मंचनम् अपि भवति

(8) यत्र "श्री पादशिला" च अपि प्रसिद्धे। यत्र भगवती कन्याकुमारी तत्रैव एकपादेन स्थित्वा तपः आचरितवती तत्र शिलायां दक्षिण पादस्य चिह्नं स्पष्टतया दृश्यते।

(9) एकस्मात् स्थानात् एव सूर्योदयः सूर्यास्तः च द्रष्टुं शक्यते।

प्र० (क) काश्चन द्वादश-नूतनाः प्रहेलिकाः संस्कृत भाषाय समाधानसहिता लेखनीयः।

उ० संस्कृत भाषाय द्वादश-नूतनाः प्रहेलिकाः समाधानसहिता वर्णनम्

(1) धरायाः उपरि अधः अपि वसति।
धूमः भूत्वा गगने इतस्ततः भ्रमति।
समाधान → जलम्

(2) भोजनम् न खादति पिबती न जलम्।
निरन्तरम् चलति बोधयति च समयम्।
समाधान → घटिका :

(3) अपदो दूरगामी च साक्षरः न च पण्डितः।
अमुखः स्फुटवक्ता च यः जानाति सः पण्डितः।
समाधान → पत्रम्

(4) स्वच्छाच्छवदन लोकाः द्रष्टुमिच्छन्ति मे यदा
तत्रात्मानं हि पश्यन्ति खिन्नं भद्रं यथायथम्
समाधान → दर्पण

CLASSTIME

Title Date
Page

(5) अस्ती कुक्षी शिरो नास्ती बाहु रस्ती निरंगुली।
अहतो नर भक्षीचा यो जानाती स: पण्डित:।
समाधान :- युतकम्

(6) कृष्णमुखी न मार्जारी द्विजिह्वा न च सर्पिणी।
पञ्चमर्ता न पाञ्चाली यो जानाती स: पण्डित:।
समाधान:- लेखनी

(7) मुखं कृष्ण वायु: क्षीण: मंजूषाया च संस्कृतम्।
घर्षण मे दह्यात्याशु रसवत्यां वसामहम ।
समाधान :- अग्निपेटिका

(8) सुतोऽपि नेत्रे न निमीलयामि जलस्य मध्ये निवसामि नित्यम
स्वजातिजीमा मम भोजनानि, वदन्तु मान्य: मम नामधेयम
समाधान :- मत्स्य:

(9) स्नेहं ददाति यो मह्यं नित्यं तस्मै ददाम्यहम्
ज्योति: पदार्थज्ञानार्थ कोऽपि वदतु साम्प्रतम्
समाधान :- दीपक:

(10) यानस्याङ्क हरे: शस्त्रं चिन्हं भारत भुयते
चलत वर्तुलाकार यो जानाति स: पण्डित :
समाधान :- अशोक: चक्र:

(11) मुखात दन्तौ बहि: कस्य दीर्घा कस्यास्ति नासिका
नासिकैव करोति सर्वाणी कर्मणि तेन स: शोभते
समाधान :- गज:

CLASSTIME

Title ______ Date ______

______ Page ______

(१२) त्रिनेत्रोऽपि शिवो नास्मि, घटो नास्मि जलान्वित:।
कूर्चश्मश्रुयुतो नित्यं, नरो नास्मि माम् ।
<u>समाधान</u> :- नारिकेलफलम्

CLASSTIME